स्तोकः, पुं, (स्तुच्यते इति । स्तुच प्रसादे + घञ् ।) चातकः । इति मेदिनी ॥ बिन्दुः । कणा । इति केचित् ॥ (यथा, मार्कण्डेये । ४९ । ५९ ।
"हृष्टावरुद्धैरभवत् स्रोतः खातानि निम्नगाः ।
ये पुरस्तादपां स्तोका आपन्नाः पृथिवीतले ॥")
तथा च भागवते । ८ । ६ । ४८ ।
"एवं गृहेष्वभिरतो विषयान् विविधैः सुखैः ।
सेवमानो न चातुष्यादाज्यस्तोकैरिवानलः ॥")

स्तोकः, त्रि, (स्तुच् + घञ् ।) अल्पः । इत्यमरः । ३ । १ । ६१ ॥ (यथा, महाभारते । १ । १ । २१८ ।
"सञ्जयैर्वंगते प्राणांस्त्यक्तुमिच्छामि मारिषम् ।
स्तोकं ह्यपि न पश्यामि फलं जीवितधारणे ॥")

स्तोककः, पुं, (स्तोक एव । स्वार्थे कन् ।) चातकपक्षी । इत्यमरः ॥ (यथा, मनुः । १२ । ६७ ।
"रक्तानि हृत्वा वासांसि जायते जीवजीवकः ।
वृको मृगेभं व्याघ्रोऽश्वं फलमूलन्तु मर्कटः ।
स्त्रीमृक्षस्तोकको वारि यानान्युष्ट्रः पशूनजः ॥"

स्तोता, [ऋ] त्रि, (स्तौतीति । स्तु + तृच् ।) स्तवकर्त्ता । ष्टुधातोस्तृण्प्रत्ययेन निष्पन्नः ॥ (यथा, ऋग्वेदे । ८ । ४४ । १९ ।
"स्तोता स्यां तव शर्म्मणि ॥")
तद्वैदिकपर्य्यायः । रेभः १ जरिता २ कारुः ३ नदः ४ स्तामुः ५ कीरिः ६ गौः ७ सूरिः ८ नादः ९ छन्दः १० स्तुप् ११ रुद्रः १२ कृपण्युः १३ । इति त्रयोदश स्तोतृनामानि । इति वेदनिर्घण्टौ । ३ । १६ ॥ (विष्णुः । इति महाभारतम् । १३ । १४९ । ८६ ॥)

स्तोत्रं, क्ली, (स्तूयतेऽनेनेति । स्तु + "दाम्नीशसयुयुजेति ।" ३ । २ । १८२ । इति ष्ट्रन् ।) स्तवः । इत्यमरः । १ । ६ । ११ ॥ तच्चतुर्व्विधं यथा, मात्स्ये १२१ अध्याये ।
"अत्र वो वर्णयिष्यामि विधिं मन्वन्तरस्य तु ।
ऋचो यजूंषि सामानि तथावत् प्रति दैवतम् ।
विधिहोत्रं तथा स्तोत्रं पूर्व्ववत् संप्रवर्त्तते ॥
द्रव्यस्तोत्रं कर्म्मस्तोत्रं विधिस्तोत्रं तथैव च ।
तथैवाभिजनस्तोत्रं स्तोत्रमेतच्चतुष्टयम् ॥
मन्वन्तरेषु सर्व्वेषु यथा भेदाद्भवन्ति ये ।
प्रवर्त्तयन्ति तेषां वै ब्रह्मस्तोत्रं पुनः पुनः ॥"

स्तोभः, पुं, (स्तुभ + घञ् ।) सामावयवविशेषः । स तु गीतालापपूरणाक्षरः । स च त्रयोदशविधो यथा । अयं वावलोको हाउकारो १ वायुर्हाइकारः २ चन्द्रमा अथकारः ३ । आत्मेहकारो ४ ऽग्निरीकारः ५ आदित्य ऊकारः ६ । निहव एकारो ७ विश्वेदेवा औहोइकारः ८ प्रजापतिर्हिंकारः ९ । प्राणः स्वरो १० ऽन्नं या ११ वाग्विराड्निरुक्त १२ स्त्रयोदशः स्तोभः सञ्चरो हुंकारः १३ । दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवं साम्नामुपनिषदं वेदोपनिषदं वेद । इति छान्दोग्योपनिषद्भाष्ये प्रथमप्रपाठकः समाप्तः ॥ * ॥

अस्य भाष्यम् । भक्तिविषयोपासनं सामावयवसम्बन्धमित्यतः सामावयवान्तरस्तोभाक्षरविषयाण्युपासनान्तराणि संहतान्युपदिश्यन्ते । अनन्तरं सामावयवसम्बन्धत्वाविशेषादयंवावाय मेव लोको हाउकारः स्तोभो रथन्तरे साम्नि प्रसिद्ध इयं वै रथन्तरमित्यस्मात् सम्बन्धसामान्याद्धाउकारः स्तोभोऽयं लोक इत्येवमुपासीत । १ ।
वायुर्हाईकारो वामदेव्ये सामनि हाइकारः प्रसिद्धो वायूसम्बन्धश्च वामदेव्यस्य साम्नो योनिरित्यस्मात् सामान्याद्धाइकारं वायुदृष्ट्योपासीत । २ ।
चन्द्रमा अथकारः चन्द्रदृष्ट्या अथकारमुपासीत अन्ने हीदं स्थितमन्नात्मा चन्द्रः थकाराकारसामान्याच्च । ३ ।
आत्मा इह कार इहेति स्तोभः प्रत्यक्षो ह्यात्मा इहेति व्यपदिश्यते इहेति च स्तोभः । ४ ।
तत्सामान्यादग्निरीकार इति । इ निधनानि चाग्नेयानि सर्व्वाणि सामानीत्यतः । ५ ।
तत्सामान्यादादित्य ऊकारः । उच्चैरूर्द्ध सन्तं आदित्यं गायन्त्युकारश्चायं स्तोभ आदित्यदैवत्ये साम्नि स्तोभ इत्यादित्य ऊकारः । ६ ।
निहव इत्याह्वानमेकारस्तोभः एहीति चाह्वयन्तीति । ७ ।
तत्सामान्याद्विश्वे देवा औहोइकारो वैश्वदेव्ये साम्नि स्तोभस्य दर्शनात् । ८ ।
प्रजापतिर्हिंकार अनिरुक्ताद्धिकारस्य चाव्यक्तत्वात् । ९ ।
प्राणः स्वरः स्वर इति स्तोभः प्राणस्य च स्वरहेतुत्वसामान्यात् । १० ।
अन्नं या या इति स्तोभोऽन्न अन्नेन हीदं यातीत्यतः । ११ ।
तत्सामान्यात् वागिति स्तोभो विराडन्नं देवताविशेषो वा वैराजे साम्नि स्तोभदर्शनात् अनिरुक्तोऽव्यक्तत्वात् इदमिदमिति निर्व्वक्तुं न शक्यत इत्यतः । १२ ।
सञ्चरो विकल्पमानस्वरूप इत्यर्थः कोऽसावित्याह हुंकारोऽव्यक्तो ह्ययतोऽनिरुक्तविशेष एवोपास्य इत्यभिप्रायः ॥ १३ ॥
स्तोभाक्षरोपासनाफलमाह । दुग्धेऽस्मै वाग् दोहमित्याद्युक्तार्थं य एतामेवं यथोक्तलक्षणं साम्नां सामावयवस्तोभाक्षरविषयामुपनिषदं दर्शनं वेद तस्यैतत् यथोक्तं फलमित्यर्थः । द्विरभ्यासोऽध्यायपरिसमाप्त्यर्थः सामावयवविषयोपासनाशेषः परिसमाप्त्यर्थो वेति ॥ * ॥ इति श्रीमद्गोविन्दभगवत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्य्यस्य श्रीमच्छङ्करभगवत्पादस्य कृतौ छान्दोग्योपनिषद्विवरणे प्रथमः प्रपाठकः समाप्तः ॥ * ॥ * ॥ हेलनम् । स्तम्भनम् । इति हेमचन्द्रः ॥ अपि च ।
"साङ्केत्यं पारिहास्यं वा स्तोभं हेलनमेव वा ।
वैकुण्ठनामग्रहणमशेषाघहरं विदुः ॥"
इति श्रीभागवते । ६ । २ । १४ ॥
"साङ्केत्यं पुत्रादौ साङ्केतितम् । पारिहास्यं परिहासेन कृतम् । स्तोभं गीतालापपूरणार्थं कृतम् । हेलनं किं विष्णुनेति सावज्ञमपि च वैकुण्ठनामोच्चारणम् ।" इति तट्टीकायां श्रीधरस्वामी ॥

स्तोम, त् क श्लाघने । इति कविकल्पद्रुमः ॥ अदन्त चुरा०-पर०-सक०-सेट् ।) अतुस्तोमत् । इति दुर्गादासः ॥

स्तोमं, क्ली, (स्तूयते इति । स्तु + "अर्त्तिस्तुसुहुस्रिति ।" उणा० १ । १३९ । इति मन् ।) मस्तकम् । धनम् । शस्यम् । लोहाग्रदण्डः । वक्रे, त्रि । इति केचित् ॥

स्तोमः, पुं, (स्तु + मन् ।) समूहः । इत्यमरः । २ । ५ । ३९ ॥ (यथा, उत्तररामचरिते । १ अङ्के
"ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥")
यज्ञः इति हेमचन्द्रः ॥ स्तवः । इति चामरः । ३ । ३ । २४१ ॥

स्तौपिकं, क्ली, बुद्धद्रव्यविशेषः । इति त्रिकाण्डशेषः ॥ श्रोघा इति हिन्दी भाषा ॥

स्त्यानं, क्ली, (स्त्यै + क्तः ।) स्निग्धम् । प्रतिध्वानम् । घनत्वम् । (यथा, उत्तररामचरिते । २ अङ्के ।
"दधति कुहरभाजामत्र भल्लूकयूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि ॥")
आलस्यम् । इति विश्वमेदिन्यौ ॥

स्त्यानः, त्रि, संहतिकर्त्ता । ध्वनिकर्त्ता । इति स्त्यैधातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः । इति मुग्धबोधव्याकरणम् ॥

स्तेनः, पुं, (स्त्यायतीति । स्त्यै + "श्यास्त्याहृञ विभ्य इनच् ।" उणा० २ । ४६ । इति इनच् ।) चौरः । असृतम् । इत्युणादिकोषः ॥

स्त्यै संहतौ । ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वा पर०-अक०-अनिट् ।) दन्त्यादिरन्तः स्थाद्ययुक्तमध्यः । स्त्यायति तिस्त्यासति । इति दुर्गादासः ॥

स्त्री, स्त्री, (स्त्यायति गर्भो यस्यामिति । स्त्यै + "स्त्यायतेः ड्रट् ।" उणा० ४ । १६५ । ड्रट् । डित्त्वात् टिलोपः । टित्त्वात् ङीप् ।) स्तनयोन्यादिमती । तत्पर्य्यायः । योषित् २ अबला ३ योषा ४ नारी ५ सीमन्तिनी ६ बधूः ७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११ इत्यमरः । २ । ६ । २ ॥ प्रिया १२ रामा १३ जनिः १४ जनी १५ योषिता १६ जोषित् १७ जोषा १८ जोविता १९ वनिका २० महेलिका २१ महेला २२ । इति शब्दरत्नावली ॥ शर्व्वरी २३ सिन्दूरतिलका २४ सुभ्रूः २५ । इति जटाधरः ॥ सुनयना २६ वामदृक् २७ अङ्गना २८ ललना २९ कान्ता ३० पुरन्ध्री ३१ वरवर्णिनी ३२ सुतनुः ३३ तन्वी ३४ तनुः ३५ कामिनी ३६ तन्वङ्गी ३७ रमणी ३८ कुरङ्गनयना ३९ भीरुः ४० भाविनी ४१ विलासिनी ४२ नितम्बिनी ४३ मत्तकाशिनी ४४ सुनेत्रा ४५ प्रमदा